प्रज्ञालोकः (२३२०-५९११) इति समीक्षकपरीक्षितायाः (Peer Reviewed) शोधपत्रिकायाः कृते प्रबन्धा आमन्त्र्यन्ते। इ-मेलद्वारा प्रबन्धप्रेषणस्य अन्तिमः दिनाङ्कः ३०/११/२०१५ (नवम्बरमासस्य त्रिंशं दिनम्)। प्रतिवर्षं जुलैमासस्य चतुर्थे दिने विश्वविद्यालयस्य प्रतिष्ठादिनोद्यापन समावर्तनं च उपलक्ष्य शोधपत्रिका प्रकाश्यते। अग्रिमः अङ्कः ४/७/२०१६ दिनाङ्के प्रकाशयिष्यते। प्रबन्धप्रेषणया केचन नियमा अनुसर्तव्याः। ते अधः लिख्यन्ते।

## प्रबन्धस्य नियमाः

- प्रबन्धः संस्कृतवाङ्मयस्य केनाप्येकेनाङ्गेन सम्बद्धः स्यात्।
- प्रबन्धः संस्कृतभाषया आङ्ग्लभाषया वा Unicode आधारितदेवनागरीलिप्या / रोमनलिप्या वा १४ अक्षरमानेन A4 पृष्ठे टङ्कितः स्यात्। पार्श्वसीमा प्रतिदिशम् १ इञ्च भवेत्। हस्तलिखितपाण्डुलिपिः प्रकाशनाय न गृह्यते।
- Word आधारितं सञ्चिकाप्रारूप स्यात्।
- प्रबन्धः अनधिकैः सहस्रद्वयेन (२०००) शब्दैः लिखितः भवेत्।
- प्रबन्धस्य संक्षिप्तिकाऽपि अनधिकैः २००शब्दैः प्रेषणीया।
- प्रबन्धस्य अन्ते लेखकस्य नाम, वृत्तिः, सङ्केतः, दूरभाषक्रमाङ्कः, इ-मेलसङ्केतः च अवश्यं लेखनीयम्।
- प्रबन्धेन सह अयं प्रबन्धः अन्यत्र प्रकाशनार्थं न प्रेषित इति प्रमाणपत्रम् अपि देयम्। अन्यत्र स लेखः प्रकाशितः चेद् लेखकं विरुध्य वैधिकव्यवस्था गृह्यते। प्रमाणपत्रस्य स्वरूपं वक्ष्यते।
- कस्मिंश्चिद् ग्रन्थे, अन्तर्जाले वा प्रकाशितस्य प्रबन्धस्य अंशः अपि यथावत् प्रबन्धे न लेखनीयम्। तथा कृतं चेद् अवश्यं तस्य पादटिप्पणी देया।
- परिशीलितग्रन्थसूची अवश्यं भवेत्।
- पादटिप्पणीनां विषये वक्ष्यमाणनियमा आश्रयणीयाः।
- प्रबन्धस्य परिशीलनं परीक्षकाः करिष्यन्ति। तैः सूचितानि परिवर्तनानि अथवा परिष्काराः कर्तव्यानि।
- Double blind peer review भविष्यति। प्रबन्धस्य प्रकाशने सम्पादकानां सिद्धान्त एव अन्तिमः भविष्यति।
- प्रबन्धः न प्रकाश्यते इति पत्रं प्राप्य एव तं प्रबन्धम् अन्यत्र प्रेषयितुम् अर्हन्ति।

## पादटिप्पणीनां ग्रन्थसूच्याः च विषये नियमाः

- सामान्यतः अस्माभिः APA शैली अनुस्रियते।
- ग्रन्थसूची इत्थं सज्जिता भवेत्।
  ग्रन्थकारः। (प्रकाशनवर्षम्)। पुस्तकस्य नाम। सम्पादकः। प्रकाशनस्थानम् : प्रकाशकः।
  उदाहरणम्-
  विश्वनाथः। (१९९८)। साहित्यदर्पणः (श्रीरामचरणतर्कवागीशभट्टाचार्यकृतया टीकया समेतः)। द्विवेदः, दुर्गाप्रसादः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
  हेगडे, जनार्दनः। (२०१३)। उत्फुल्लम् अन्तरङ्गम् (पञ्चदशकथानां सङ्ग्रहः)। बेङ्गालूरु : संस्कृतभारती।

- पादटिप्पणीनां द्विधा व्यवस्था। प्रथमतः वेद-उपनिषद्-रामायण-श्रीमद्भगवद्गीता-महाभारत-पुराणादिभ्य उद्धरणं तथा सूत्राणाम् उद्धरणम्। द्वितीयतः ग्रन्थपङ्क्त्यादीनाम् उद्धरणम्।

  1. वेद-उपनिषद्-रामायण-श्रीमद्भगवद्गीता-महाभारत-पुराणादिभ्यः मन्त्राणां श्लोकानां वा उद्धरणे श्लोकस्य पार्श्वे एव [] (Square Bracket) मध्ये ग्रन्थनाम, अध्यायः, श्लोकसङ्ख्या च लेख्यम्।
     उदाहरणम्
     
     यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
     अभ्युत्थानम् अधर्मस्य तदात्मानं सृजाम्यहम्॥ [श्रीमद्भगवद्गीता ४/७]
     इयं सीता मम सुता सहधर्मचरी तव॥
     प्रतीच्छ चैनां भद्रं ते पाणीं गृह्णीश्व पाणिना।
     पतिव्रता महभागा छाय इव अनुगता सदा॥[वाल्मिकीयरामायणम् ७३/२६-२७]

  2. सूत्राणाम् उद्धरणे अपि इयम् एव व्यवस्था। यथा – वृद्धिरादैच् [अष्टाध्यायी १/१/१], अथ योगानुशासनम् [योगसूत्रम् १/१] इत्यादि।
  3. यस्माद् ग्रन्थाद् उद्धरणं दीयते तस्य ग्रन्थस्य विवरणं ग्रन्थसूच्यां देयम्।

- द्वितीयतः ग्रन्थानां पङ्क्तय उद्ध्रियन्ते। तेषां व्यवस्था द्विधा। प्रसिद्धशास्त्रकाराणा ग्रन्थेभ्य उद्धरणं तथा आधुनिकेभ्यः ग्रन्थेभ्य उद्धरणम्। प्रसिद्धशास्त्रग्रन्थेभ्य उद्धरणस्य व्यवस्था इत्थम्-

  1. यदि ग्रन्थः टीकारूपः स्यात् तर्हि मूलसूत्रस्य, मूलपङ्क्तेः वा स्थानं लेख्यम्।
     यथा –
     न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते।१
     १ श्रीमद्भगवद्गीतायां १८.६६ श्लोकस्य शाङ्करभाष्यम्।
  2. यदि मूलग्रन्थ एव भवेत् तर्हि ग्रन्थस्य नाम, प्रकरणं, श्लोकसङ्ख्यादिकं च लेख्यम्।
  3. आधुनिकग्रन्थाना विषये ग्रन्थकारस्य नाम तथा पृष्ठसङ्ख्या लेखनीया। ग्रन्थस्य सम्पूर्णं विवरणं तु ग्रन्थसूच्यां देयम्।

सम्पादकाः
प्रज्ञालोकस्य